अनन्तशयनसंस्कृतग्रन्थावलिः—ग्रन्थाङ्कः—२३४

पौरस्त्यभाषागवेषणहस्तलिखितग्रन्थप्रसाधनकार्यालयः

केरलविश्वविद्यालयः

सुबालावज्रतुण्डम् — (नाटकम्)

श्रीरामविरचितम्

प्रसाधकः

डाक्टर्. के. राघवन् पिळ्ळ

पौरस्त्यभाषागवेषणहस्तलिखितग्रन्थप्रसाधनकार्यालयाध्यक्षः

१९७१ | ११४६

अनन्तशयने
श्रीवत्समुद्रणालये
मुद्रितम्

मूल्यम्

INTRODUCTION

Subālāvajratuṇḍam, which appeared in Volume XVI No. 1 of the Journal of the Kerala University Oriental Research Institute and Manuscripts Library, is now being published as T. S. S. No. 234. The unique feature of the play is that all the characters in it belong to the animal world. Mice, serpent, lizard, chameleon etc. are the characters which take part in it. Human feelings and emotions are attributed to these animals and they are made to behave like humans. Kamalinīrājahamsa of Pūrṇasarasvatī* is a similar play with the only difference that the characters occurring in it are some natural phenomena and objects of Nature personified.

The author of the play, as can be understood from the Prastāvana, is Sri Rama, who was the son of a king[1] Mahākavi Uḷḷūr says that he is either a Kṣatriya or the scn of a Kṣatriya born in a woman of another caste[2]. According to Kṛṣṇamācāriar, he belongs to Malabar in

---

* Published from this Institute as T. S. S. No. 159.

1 श्रीरामनाम्ना नृपभुवा Page. 2

2 Kerala Sahitya Caritram Vol. III Page. 5

Kerala[3]. But Uḷḷūr says that we have no information on either the date or the place where the dramatist was born and lived[4]. The patron deity of the dramatist is God Parameśvara, as is evident from the two verses occurring at the beginning of the play. These two verses eulogise Goddess Pārvati and God Parameśrava No further information regarding the author is given in the play.

The main plot of the play is the mutual love between the mouse prince Vajratuṇḍa and the mouse princses Subālā, which finally leads to their marriage. As is generally the case, here also love does not run smooth. Obstacles crop up, but they are overcome and finally everything ends well through divine grace.

Thus we see that the central theme of the play is in agreement with the usual character of the Sanskrit drama. The dramatist deals with love in its different stages. The meeting of the hero and the heroine, the love at first sight which developed between them, the longing of the hero for the heroine, the bringing of cooling materials for the relief of the love-sick heroine, the advent of unforeseen obstacles which stand in the way of their union, the mental agony undergone in separation, the overcoming of the obstacles and the final union of the

---

3 History of Classical Sanskrit Literature by Kṛṣṇamācāriar Page 664.

4 Kerala Sāhitya Caritram Vol. III page 60

couple are all portrayed by the dramatist in a very systematic way.

After tne invocation to Lord Śiva and Goddess Pārvati, the Sūtradhāra calls in the Pāripārśvika and says that at the bidding of the noble audience, he is going to enact the play called Subālāvajratuṇḍam composed by Sri Rāma. In Act I proper, Vajratuṇḍa and Subālā meet and love at first sight developes between them.

In Act II are introduced the conventional love-sick hero and the heroine. Vajratuṇḍa confesses to his friend Adharin his intense love for Subālā and Subālā also confesses to her friend Bhinnakarṇi, her love for Vajratuṇḍa. Subālā's mental agony is so intense that the cool rays of the moon appear to her as the scorching rays of the sun. She sends her friend to bring some cooling materials so as to get a little relief from the heat of the pangs of love. She finds it very difficult to withstand her mental distress and so decides to put an end to her life. Vajratuṇḍa who was watching her all along, immediately comes out from his hiding place and dissuades her from her attempt at suicide. He takes her away. Bhinnakarṇi comes with the cooling materials and wonders where her friend has gone. A lizard informs her of the abduction of Subālā by Vajratuṇḍa. The news is then conveyed to Subālā's father Pāṣāṇadāraṇa, who sends a mighty army of mice against Vajratuṇḍa to rescue his daughter. Vajratuṇḍa bravely challenges the mighty army and faces

it single-handed. At the very sight of this valiant prince the mice retreat with fear and flee for their lives.

In Act III, the charming princess Subālā is kidnapped by Raktānga, the serpent king. Her piteous cries for help are heard by Vajratuṇḍa and Adharin, who are engaged in searching for food grains. Vajratuṇḍa and his friend fail to understand the real significance of the cry. Vajratuṇḍa apprehends the advent of something evil as is indicated by the throbbing of his left arm. Adharin says that the sound they hear is that produced by the paddy fields· Vajratuṇḍa laughs at his foolish words. Soon he realises the fact that the sound emanates from his beloved and he immediately sets out to rescue her. But he soon falls into a swoon. The quickminded Adharin, chalks out a plan to restore his friend to consciousness. He whispers into Vajratuṇḍa's ears that he has seen Subālā. These words are powerful enough to bring him back to his senses. He suddenly gets up and sends Adharin to arrange his four divisions of army to fight against Raktānga. Vajratuṇḍa's father Bṛhattuṇḍa hearing of the abduction of his son's beloved by the serpent king, despatches to his son his four divisions of army headed by the brave commander-in-chief Dīrghapuccha·

In Act IV we get an account of the fight that raged between Vajratuṇḍa and Raktānga from the conversation between the father chameleon and son chameleon.

In the fight many warriors of the mice army are killed by the poisonous breath and poisonous bite of the serpent and the rest of the army flee for their lives. But Vajratuṇḍa faces the enemy courageously. Realising the impossibility to defeat the mighty enemy single-handed, he thinks of a plan to capture him by trick. He bores a hole in the soil and enters into it. Raktāṅga furiously chases him and enters into the hole. Immediately the mouse comes out through another hole and with his sharp teeth and nails tear asunder the hinder part of the serpent's body which is still outside the hole. He then closes both ends of the hole, and thereby puts an end to his life. By this time Subālā's father Pāṣāṇadāraṇa comes with a huge army for the rescue of his daughter.

Act V introduces the desperate hero. Though he has put an end to his enemy, he finds to his utter despair that his beloved has already died at the hands of the enemy. Both Vajratuṇḍa and Pāṣāṇadāraṇa brood over the death of Subālā. The Great Mouse, the Vāhana of Lord Gaṇapati, by his divine powers, comes to know of the misfortune that has befallen his devotee Vajratuṇḍa and appears before them. He sprinkles some holy water on the dead body of Subālā whereby she

is restored to life. The Divine Mouse blesses the couple and thus the play ends with the happy union of the lovers.

Sṛṅgāra is the main sentiment in the play. Vīra and Karuṇa are also occasionally delineated as adding to the development of the main rasa. The style is simple and the diction sweet. The play is not wanting in beauty of idea and expression. Here and there we get some pieces of good poetry. The description of sunrise given in Act II is quite suggestive.

प्रियायाः पद्मिन्या विरहपरितापेन विगत-
प्रतापोऽयं रागी रविरुदयशैलोपरि गतः ।
निजालोकोत्फुल्लां शशिकरकृतातङ्करहितां
सहस्रैर्दोर्ष्णां तां दृढमुपजुगूह प्रणयिनीम् ॥

Act II-6

Vajratuṇḍa describes the unparalleled Charm of Subālā as follows:-

अस्याः सखे पृथुनितम्बपयोधरायाः
पीत्वाधरामृतमलभ्यमपि सुधाम्नाम् ।
आश्लेषसौख्यमनुभूय रतावसाने
शेते सुखं जगति यः सुकृती स एव ॥

Act I-II

Some people[1] consider this as a satirical work

1. For example see the article 'A Satirical Play in Sanskrit' by Sri. S. Subramoniam, in the Silver Jubilee Number (1963) of the Journal of the Kerala University Manuscripts Library.

in the stereotyped manner without even a tinge of directed aganist the dramatists who compose their works originality. But there is hardly anything by way of satire in this play. Since the characters in this play belong to the animal world, it might have been meant to be a satirical work, though the satirical element is not at all prominent here. This can also well be a transfer to the animal world the doings and feelings of the human beings as in the Pañcatantra. The exact intention of the author in composing such a play is anyway not at all clear.

The edition is based on Transcript No- 817 and Palm leaf Manuscript No. 12340 belonging to this Institute.

Credit is due for this work of Sri. A. Ramachandra Sastri, Senior Research Officer, M. Madhavan Unni, Assistant Research Offlcer and Smt. K. Visweswari Amma Assistant Research Officer.

Trivandrum,
19–5–71.

K. Raghavan Pillai,
Director.

॥ श्री ॥

सुबालवज्रतुण्डम्

श्रीरामविरचितम् ।

चन्द्रचूडं परं धाम चन्द्रिकाविमलच्छवि ।
स्पन्दतां हृदि सन्तापसन्तानशमनाय वः ॥ १ ॥

[नान्द्यन्ते ततः प्रविशति सूत्रधारः ।]

सूत्रधारः—

श्रीकण्ठस्य ललाटलोचनपुटादुद्भ्रान्तसप्तार्चिषा
साकं पुष्पशरैः सहेक्षुधनुषा दग्धे मनोजन्मनि ।
या स्वोन्मुक्तकटाक्षसायकवरेणादत्त देहार्धकं
पत्युः सा तुहिनाचलप्रियसुता भूयात् प्रमोदाय वः ॥ २ ॥

प्रणयकुपितां देवीं नत्वोत्थितः परिसान्त्वयन्
मुखमुपगतज्योत्स्नान्तस्मेरमित्युपगूहयन् ।
नयनहुतभुक्छायारक्तेक्षणां परमेश्वरो
भयचकितधीर्दृष्ट्वा भूयो नमन्नवतात् स वः ॥ ३ ॥

अलं प्रविस्तरेण । तद् यावत् पारिपार्श्विकमाहूय प्रस्तुतकर्मसिद्धये व्याप्रियामहे । [नेपथ्याभिमुखमवलोक्य] मारिष इतस्तावत् ।

[प्रविश्य पारिपार्श्विकः]

पारिपार्श्विकः— आर्य अयमस्मि ।

सूत्रधारः— आदिष्टोऽस्मि सकलविस्मयनीयविद्यादयागुणभाजनेन सभाजनेन । यथा- कविना श्रीरामनाम्ना नृपसुना रचितं सुबालावज्रतुण्डं नाम नाटकं भवताभिनयचतुष्टयेन प्रवृद्धरसं प्रयोक्तव्यमिति । तदावां सन्नह्यावः ।

पारिपार्श्विकः— भाव! यद्येवं नैपथ्यरचनां कर्तुं साधयावः ।

[उभौ परिक्रामतः ।]

पारिपार्श्विकः— भाव किमयं हाहाशब्दः श्रूयते ।

सूत्रधारः— अये परपरिभूताया मद्गृहिण्या इव स्वरः । [विचिन्त्य] भवतु,

गृहिणीमानयाम्येनां निहत्य रिपुमाहवे ।
मूषिकप्रवरामात्यो वज्रतुण्डो यथा प्रियाम् ॥ ४ ॥

[निष्क्रान्तौ ।]

[ततः प्रविशति गौली ।]

गौली — अहो नु खलु अतिबहुमानास्पदं महामूषिकामात्यस्य वज्रतुण्डस्य महिमा । यस्य प्रतापादिगुणेन विनायकवाहनो मूषिकराजोऽप्यस्मदमात्यो भवतु भवानित्युक्तवान् । अपि च,

लब्ध्वा बाहुविनिर्जितोन्दुरुगणैरानीयमानं करं
भक्त्या सम्परितोष्य मूषिकवरं विघ्नेश्वरोद्वाहिनम् ।
दत्त्वास्मभ्यमचिन्तितान्यपि फलान्यस्मत्प्रयुक्ताशिष-
स्तुष्टः सम्प्रतिगृह्य सम्प्रति वयस्येन प्रतस्थे पुरात् ॥ ५ ॥

तद्वयमपि तत्प्रसादलब्धेन श्यामाकादिधनेन स्वभवनं गच्छामः । [निष्क्रान्तः ।]

विष्कम्भकः ।

[ततः प्रविशति वज्रतुण्डो विदूषकश्च ।]

वज्रतुण्डः— सखे अधरिन्! इतस्तावत् ।

विदूषकः— वअस्स! एसो ह्मि । (वयस्य! एषोऽस्मि ।)

वज्रतुण्डः— सखे इदानीम्,

वृषळीकर्तरीकृत्तकलमाभारपूरितम् ।
धान्यगेहं व्रजावेदं क्षुत्पीडापनिनीषया ॥ ६ ॥

विदूषकः— भो वअस्स! एत्तिअं वेळं मूसिअराअपूअणत्थं तुवरमाणेहिं अह्मेहिं भोअणं विसुमरिदं । दाणिं खु तस्स ओसरो । ता गच्छह्म । [उभौ परिक्रामतः ।] (भो वयस्य! इयतीं वेळां मूषिकराजपूजनार्थं त्वरमाणाभ्यामावाभ्यां भोजनं विस्मृतम् । इदानीं खलु तस्यावसरः । तद् गच्छावः ।)

वज्रतुण्डः— [निमित्तं सूचयन्]

वामेतरोऽयं बाहुर्मे कथं प्रस्पन्दतेऽधुना ।
सर्वोऽभिलाषः पूर्णो मे मूषिकेन्द्रप्रसादतः ॥ ७ ॥

विदूषकः— भो वअस्स! तक्केमि दाव इमिणा सुणिमित्तेण

आसण्णा दे पिअदमेत्ति । (भो वयस्य! तर्कयामि तावदनेन सुनिमित्तेनासन्ना ते प्रियतमेति ।)

वज्रतुण्डः— किं किं प्रियतमेति ।

विदूषकः— पिअदमा खु दे कळमावळित्ति मए भणिदं । (प्रियतमा खलु ते कलमावलिरिति मया भणितम् ।)

वज्रतुण्डः— सखे! इदं धान्यगेहम् । यावत् प्रविशावः ।

[उभौ प्रवेशं नाटयतः ।]

विदूषकः— भो वअस्स! महुरमहुरो वीणाए विअ सरो सुणीअदि । (भो वयस्य! मधुरमधुरो वीणाया इव स्वरः श्रूयते ।)

वज्रतुण्डः— सखे! नायं वीणास्वरः । श्रूयते कस्याश्चिन्मूषिकयोषितः शीत्कारः । [पुनः सस्पृहमाकर्ण्य]

शीत्कारोऽयममुष्या माधुर्यान्मशकगीतिमतिशेते ।
मदनोन्मादमदभ्रं जनयेद्धृदि शृण्वतां पुंसाम् ॥ ८ ॥

विदूषकः— [स्वगतं] भो एदस्स हिअअं अण्णारिसं विअ कहेहि मअणविआरो । ता कीरिसो एदस्स परिणामोत्ति ण आणामि । (भो एतस्य हृदयमन्यादृशमिव कथयति मदनविकारः । तत् कीदृश एतस्य परिणाम इति न जानामि ।)

[नेपथ्ये]

सहि इदो इदो । (सखि! इत इतः ।)

वज्रतुण्डः— सखे अधरिन्! अपि श्रुतं भवता ।

वचनमिदममृतधारावर्षि श्रवसोर्मदीययोर्जातम् ।
मन्ये त्रिभुवनविजयप्रथितब्रह्मास्त्रमन्त्रमङ्गभुवः ॥ ९ ॥

सखे! तद्वचनमदिरामोदपरवशानि मे गात्राणि ।

विदूषकः— [सावधानं विलोक्य] भो वअस्स! एसा तिस्से पदपंती दीसइ। ता इमिणा मग्गेण गदुअ तं अण्णेसामो। (भो वयस्य! एषा तस्याः पदपङ्क्तिर्दृश्यते। तदनेन मार्गेण गत्वा तामन्विष्याव ।)

वज्रतुण्डः— बाढम् । [उभौ परिक्रामतः ।]

विदूषकः— भो वअस्स! चिट्ठ चिट्ठ । अत्तभवं पुण जिस्से सरं सुणिअ ईरिसं अवत्थं पडिपण्णो तिस्से सआसगअस्स तुज्झ अदो वरं संकडं आगमिस्सदित्ति तक्केमि । (भो वयस्य! तिष्ठ तिष्ठ। अत्रभवान् पुनर्यस्याः स्वरं श्रुत्वा ईदृशीमवस्थां प्रतिपन्नस्तस्याः सकाशगतस्य तव अतः परं सङ्कटमागमिष्यतीति तर्कयामि ।)

वज्रतुण्डः— सखे! नायं परिहासावसरः । तद्दर्शनाय त्वरिततरं गच्छावः । [उभौ परिक्रामतः ।]

विदूषकः— एसा कावि कळमकणिसं खादइ । (एषा कापि कलमकणिशं खादति ।)

वज्रतुण्डः— [सानन्दमवलोक्य] सखे! इयमतिसुकुमाररूपा तपस्विनी । [पुनर्विचिन्त्य]

रसी नायं धाता प्रकृतिजळ एवामृतकरः
प्रजासृष्टौ कामोऽप्यपरिचयतो नैव सुकृती ।

न सृष्टं केनापि प्रचुरतरलावण्यसुभगं
स्वयंभूतं मन्ये वपुरिदममुष्या निरुपमम् ॥ १० ॥

विदूषकः— भो वअस्स! एसा जीहाए महुरोवदंसं विअ अक्खीणं सुहं करेदि । (भो वयस्य! एषा जिह्वाया मधुरोपदंशमिवाक्ष्णोः सुखं करोति ।)

वज्रतुण्डः—

अस्याः सखे! पृथुनितम्बपयोधरायाः
पीत्वाधरामृतमलभ्यमपि सुधाम्नाम् ।
आश्लेषसौख्यमनुभूय रतावसाने
शेते सुखं जगति यः सुकृती स एव ॥ ११ ॥

[ततः प्रविशति सुबाला नाम मूषिककन्या चेटी च ।]

सुबाला— हंजे भिण्णअण्णे! अदिभुत्ती मं अदिमत्तं संतप्पेदि । ता एत्थ पदेसे मुहुत्तं उपविसिअ गच्छह्म । (हञ्जे भिन्नकर्णे! अतिभुक्तिर्मामतिमात्रं सन्तर्पयति । तदत्र प्रदेशे मुहूर्तमुपविश्य गच्छावः ।)

चेटी— जं आणवेदि । (यदाज्ञापयति ।)

[उभे उपविशतः ।]

सुबाला— [दृष्ट्वा सानन्दं हृदयगतं] को णु खु एसो कंदप्पसमाणरूवो दीसइ । (को नु खल्वेष कन्दर्पसमानरूपो दृश्यते ।)

चेटी— [स्वगतं] अम्मो! मूसिअकुमारो आअच्छदि । [पुनस्सुबालां विलोक्य] एदस्सिं महाणुभावे अणुरंजदि विअ से हिअअं ।

(अम्मो! मूषिककुमार आगच्छति । एतस्मिन् महानुभावे अनुरज्यत इवास्या हृदयम् ।)

विदूषकः— भो वअस्स एसा किंपि चिंतअंती चिट्ठइ । ता अप्पआसं उपविसिअ तिस्से सेराळावं सुणिअ हिअअगअवुत्तंतं जाणिअ पुणो अ ता णिअत्ताणं पआसअम्ह । (भो वयस्य! एषा किमपि चिन्तयन्ती तिष्ठति । तदप्रकाशमुपविश्य तस्याः स्वैरालापं श्रुत्वा हृदयगतवृत्तान्तं ज्ञात्वा पुनश्च तावन्निजात्मानं प्रकाशयावः ।)

वज्रतुण्डः— बाढम् । [तथा कुरुतः ।]

सुबाला — हदह्मि । मम हिअअं वि अवहरिअ गदो सो । हा! दव्वासिविणो मए दिट्ठो । (हतास्मि । मम हृदयमपि अपहृत्य गतः सः । हा! भव्य(सुन्दर)स्वप्नो मया दृष्टः ।)

चेटी — [स्वगतं] किं आअदो सो कुमारो ओअदो अ । इमाए मदणुंमादो वि विउणिओ । ता कीरिसो एदस्स परिणामो । (किमागतः स कुमारोऽपगतश्च । अस्या मदनोन्मादोऽपि विगुणितः । तत् कीदृशोऽस्य परिणामः ।)

सुबाला — [दीर्घं निःश्वस्य] हा मणोअरदइअ! कहिं गदोसि । (हा मनोहरदयित! कुत्र गतोऽसि ।)

चेटी— भट्टिदारिए! किं तुए विप्पळविदं । (भर्तृदारिके! किं त्वया विप्रलपितम् ।)

सुबाला— [सलज्जं] हंजे! ईरिसो मे सिविणब्भमो । (हञ्जे! ईदृशो मे स्वप्नभ्रमः ।)

चेटी— मअणब्भमो त्ति कहेहि । कहं पुण अप्पसुत्ताअं तुइ सिविणब्भमो । (मदनभ्रम इति कथय । कथं पुनरप्रसुप्तायां त्वयि स्वप्नभ्रमः ।)

सुबाला— [सरोषं] कहं मअणब्भमो त्ति तुए मंतिदं । (कथं मदनभ्रम इति त्वया मन्त्रितम् ।)

चेटी— तस्स मूसिअजुअराअस्स दंसणादो आरहिअ अण्णारिसं विअ दे हिअअं । तेण ज्जिअ मए मंतिदं । (तस्य मूषिकयुवराजस्य दर्शनादारभ्य अन्यादृशमिव ते हृदयम् । तेनैव मया मन्त्रितम् ।)

सुबाला— तहिं अणुत्तरह्मि । (तर्हि अनुत्तरास्मि ।)

विदूषकः— भो वअस्स! सुदं तुए तत्तहोदीए वअणं । (भो वयस्य! श्रुतं त्वया तत्रभवत्या वचनम् ।)

वज्रतुण्डः—
श्रुतमेव श्रोतव्यं सकलं मम पुण्यसञ्चयैर्लभ्यम् ।
अद्य विधेरनुगुणता सफला यदि तत्समागमश्च भवेत् ॥ १२ ॥

सुबाला— [आत्मगतं] पुव्वं मए सहीए वअणेण सुदपरक्कमरूवादिसओ मूसिअकुमारो खु अज्ज दिट्ठो । (पूर्वं मया सख्या वचनेन श्रुतपराक्रमरूपातिशयो मूषिककुमारः खल्वद्य दृष्टः ।)

वज्रतुण्डः— सखे! अस्य रूपविलोकनमुदितमनसो मम वामबाहुः परिस्पन्दते । किमिति न जानामि । [नैपथ्ये पूत्कमहाध्वनिः । सर्वे ससंभ्रमं निष्क्रान्ताः ।]

इति प्रथमोऽङ्कः ।

द्वितीयोऽङ्कः ।

[ततः प्रविशति मदनाविष्टचित्तो वज्रतुण्डो विदूषकश्च ।]

वज्रतुण्डः— सखे! अतिदुस्सहोऽयं मार्जारः । यद् दयितादर्शनमुदितं ममापि हृदयं भ्रमति । इदानीमपि निनदस्तस्य श्रूयमाण इव मे प्रतिभाति ।

विदूषकः— भो वअस्स! सुदं मए गोळीवअणेण- अज्ज खु जिणद्धं णवणीदं भक्खअन्तस्स तस्स सीसं भिदीअदित्ति । ता सुखं उवविसदु भवं । (भो वयस्य श्रुतं मया गौलीवचनेन— अद्य खल्वेव न्यस्तं नवनीतं भक्षयतस्तस्य शीर्षं भेद्यत इति । तत् सुखमुपविशतु भवान् ।)

वज्रतुण्डः— स्वस्त्यस्तु भवते । [इत्युपविश्य] सखे! एतावन्तं कालं मार्जारवाग्जालोपचितभयेन यो मदनमहानलः प्रशान्तः स इदानीमुज्जृम्भते । तत् सन्तापशमनोपायश्चिन्त्यताम् ।

विदूषकः— [चिरं विचिन्त्य] भो वअस्स! मशकप्पवरो खु दाणिं आगमिस्सदि । तस्स संगीदस्सवणेण विणोदअ संदावं । (भो वयस्य! मशकप्रवरः खल्विदानीमागमिष्यति । तस्य सङ्गीतश्रवणेन विनोदय सन्तापम् ।)

वज्रतुण्डः— सखे! न खल्वीदृशा मम मदनाश्वासनहेतवः पारवश्याच्चित्तस्य । पश्य—

भूयोऽलसैर्विवलितैर्मसृणैः प्रमुग्धै-
रस्पन्दितैस्तदनु मन्दतरैः कटाक्षैः ।

तस्या बलादपहृतं मम हन्त चित्तं
विन्दत्यनङ्गदहने पुटपाकतापम् ॥ १ ॥

विदूषकः— भो वअस्स! कुसुमाउहमुसिआ विअ तुज्झ धीरदा दाणिं। (कुसुमायुधमुषितेव तव धीरतेदानीम्।)

वज्रतुण्डः—

आदाय निशितान् बाणान् वमतोऽग्निशिखां मुखैः।
प्रहरन्मदनोऽयं मां कथं स्यात् कुसुमायुधः ॥ २ ॥

[दीर्घं निःश्वस्य] अपि च,

तुहिनकणशीतः प्रोल्लसन्मल्लिकानां
विकचकुसुमसान्द्रामोदमादाय मन्दम्।
मरुदयमपनेतुं मालयः प्राणशेषं
मदनपरमभित्रं वीजति द्वेषतो माम् ॥ ३ ॥

तद् भूयोऽपि तत्पादपद्मालङ्कृतं देशं गच्छावः।

विदूषकः— [आत्मगतं] तिस्से पदकमळसंसग्गसुहअंतिपदेसं वि कामेदुं पवुत्तो एसो। तमुद्दिसिअ कीरिसो कामोत्ति ण आणामि। [उभौ परिक्रामतः।] (तस्याः पदकमलसंसर्गशुभपंक्तिप्रदेशमपि कामयितुं प्रवृत्त एषः। तामुद्दिश्य कीदृशः काम इति न जानामि।)

[ततः प्रविशति सुबाला चेटी च।]

सुबाला— हञ्जे भिण्णअण्णे! हिज्जो ठिए पदेसे विसुमरिदं मे कळमकणिसं। ता तं देसं गच्छम्ह। (हञ्जे भिन्नकर्णे! ह्यः स्थिते प्रदेशे विस्मृतं मे कलमकणिशम्। तत् तं देशं गच्छाव।)

चेटी— जं भट्टिदारिआ आणवेदि । [उभे प्रवेशं रूपयतः ।] (यद् भर्तृदारिका आज्ञापयति ।)

विदूषकः— भो वअस्स! एसा सा आअच्छादि । ता कणिसपूरतिरोहिदा सुणुमु तेसं सेराळावं । [तथा कुरुतः ।] (भो वयस्य! एषा सा आगच्छति । तत् कणिशपूरतिरोहितौ शृणुवस्तयोः स्वैरालापम् ।)

सुबाला— [आत्मगतम्] किं णु हु हिज्जो दिट्ठो मूसिअजुवराओ कणिसंतरं गच्छादि । ता एत्थ उ पविसामि । [उभे प्रविशतः ।] (किं नु खलु ह्यो दृष्टो मूषिकयुवराजः कणिशान्तरं गच्छति । तदत्रैव प्रविशामि ।)

चेटी— भट्टिदारिए! दाणिं दे विसुमरिदं कणिसं कणिसंतरं गच्छादि । (भर्तृदारिके! इदानीं ते विस्मृतं कणिशं कणिशान्तरं गच्छति ।)

सुबाला— किं उम्मत्तिआ तुवं अहव जंगमो सो । (किमुन्मत्तिका त्वमथवा जङ्गमः सः ।)

चेटी— जं विसुमरिदं त्ति तुए कहिदं तं कणिसं जंगमोत्ति मए मंतिदं । (यद् विस्मृतमिति त्वया कथितं तत् कणिशं जङ्गम इति मया मन्त्रितम् ।)

सुबाला— अळं ते उम्मत्ताळावेण । तपणकरेहिं दूसिअं मे सरीरं । (अलं ते उन्मत्तालापेन । तपनकरैर्दूषितं मे शरीरम् ।)

चेटी— ण खु तवणो । एसो खु सिसिरकरो एव्व । अद्धरत्ते कहं तवणप्पसंगो । (न खलु तपनः । एष खलु शिशिरकर एव । अर्धरात्रे कथं तपनप्रसङ्गः ।)

सुबाला— [सलज्जं] अलं एदिणा। अदिदूसहो मे संदावो। ता सिसिरोवआरं गह्णिअ तुरिअं आअच्छ। (अलमेतेन। अतिदुस्सहो मे सन्तापः। तच्छिशिरोपचारं गृहीत्वा त्वरितमागच्छ।)

चेटी— जं भट्टिदारिआ आणवेदि। [निष्क्रान्ता।] (यद्भर्तृदारिका आज्ञापयति।)

सुबाला— [सोन्मादं] हा वम्महहदअ! कहं मं एव्व पहरेसि। तं च जणमुद्दिसिअ एक्कं सरं मुंच तुवं। [पुनः प्रत्याकलय्य] हा पाणवल्लह! मम हिअअं वि अवहरिअ कहिं गदोसि। (हा मन्मथहतक! कथं मामेव प्रहरसि। तं च जनमुद्दिश्यैकं शरं मुञ्च त्वम्। हा प्राणवल्लभ! मम हृदयमप्यपहृत्य गतोऽसि।)

वज्रतुण्डः— [आत्मगतं] अयि दयिते! त्वयापहृतसत्त्वोऽहं तव हृदयमपहर्तुमन्यत्र गन्तुं च कथं शक्नुयाम्।

सुबाला— णिअसहधम्मआरिणं हिअअं वि परिच्चइअ इह एव्व ठिआणं पाणाणं परिच्चओ मए दाणिं कादव्वो। [इति मरणाय पाशपरिग्रहं करोति।] (निजसहधर्मचारिणं हृदयमपि परित्यज्य इहैव स्थितानां प्राणानां परित्यागो मयेदानीं कर्तव्यः।)

वज्रतुण्डः— [ससंभ्रमं] मा खलु मा खलु साहसमनुष्ठेयम् [इति करं गृह्णाति। सुबाला सलज्जं सप्रमोदं च स्थिता।]

विदूषकः— भो वअस्स धण्णगेहं रक्खन्ताणं मणुस्साणं गणो एत्थ आगमिस्सदि। ता तुरिअतुरिअं णं घेत्तूण गच्छह्म। (भो वयस्य! धान्यगेहं रक्षतां मनुष्याणां गणोऽत्रागमिष्यति। तत् त्वरितत्वरितमेनां गृहीत्वा गच्छावः।)

वज्रतुण्डः— बाढम् । [तया सह परिक्रामतः ।]

[ततः प्रविशति चेटी ।]

चेटी— आणत्तम्हि भट्टिदारिआए- संदावविणोदणत्थं सिसिरोवआरं आणअत्ति । तं मए अणुट्ठिदं च । ता एदं भट्टिदारिआसआसं णेदुं गच्छम्हि । [प्रवेशं रूपयति । सशोकं] हद्धि हद्धि ! ण दिट्ठा एत्थ भट्टिदारिआ । कहिं णु हु दाव गआ । जइ सा दुट्ठभुअंगादिणा भक्खिदा लोहिदबिंदुलक्खिदा ण भवे मेदिणी । अहव अवहरिदुं संदावं सिसिरदरप्पाणिअपुण्णं वाविं वा गआ भवे । अण्णेसिस्सं दाव । [परिक्रामति ।] अए गोळीभअवं दीसइ । (आज्ञतास्मि भर्तृदारिकया- सन्तापविनोदनार्थं शिशिरोपचारमानयेति । तन्मया अनुष्ठितं च । तदिदं भर्तृदारिकासकाशं नेतुं गच्छामि । हा धिक्! हा धिक्! न दृष्टात्र भर्तृदारिका । कुत्र नु खलु तावद् गता । यदि सा दुष्टभुजङ्गादिना भक्षिता लोहितबिन्दुलक्षिता न भवेन्मेदिनी । अथवापहर्तुं सन्तापं शिशिरतरपानीयपूर्णां वापीं वा गता भवेत् । अन्विष्यामि तावत् । अये! गौळीभगवान् दृश्यते ।)

[ततः प्रविशति गौळी ।]

गौळी— अये! गृहमूषिककुलालङ्कारभूतायाः सुबालायाः पाषाणदारणपुत्र्याश्चेटी भिन्नकर्णा नाम आगच्छति । तदभिभाषे तावदेनाम् । [प्रकाशम्] अयि भिन्नकर्णे! इदानीं कुतः समागता ।

चेटी— [सप्रणामं] सुणादु गोळीभअवं । अज्ज धण्णगेहादो भट्टिदारिआए णिओएण चूदप्पवाळादिसिसिरोवआरं घेत्तूण पुव्वणिवेसिदे पदेसे भट्टिदारिअं अप्पेक्खंती तं अण्णेसिउं एत्थ आअदा । (शृणोतु गौळीभगवान् । अद्य धान्यगेहाद् भर्तृदारिकाया नियोगेन चूतप्रवाळा-

दिशिशिरोपचारं गृहीत्वा पूर्वनिवेशिते प्रदेशे भर्तृदारिकामप्रेक्षमाणा तामन्वेष्टुमत्रागता ।)

गौली— अयि वत्से! अद्य तां कन्यकामपहृत्य वज्रतुण्डो नाम मूषिककुमार इत एवागतः ।

चेटी— भअवं जइ एव्वं अह्मेहिं पासाणदारणस्स एदं अपत्थं णिवेदणिज्जं। (भगवन् यद्येवं अस्माभिः पाषाणदारणायेदमपथ्यं निवेदनीयम्।)

गौली— तर्हि सत्वरं निवेद्यताम् ।

[चेटी सप्रणामं गता ।]

गौली— अद्य खलु वज्रतुण्डपाषाणदारणयोर्महज्जन्यं सम्भवेत् । तद् वयमपि युद्धालोकनाय सन्नद्धाः स्याम । [निष्क्रान्तः ।]

विदूषकः— भो वअस्स! सअलो वि मूसिअअणो संक्खोहिदो समुद्दो विअ आअदो । ता तुरिअतुरिअं गच्छह्म । (भो वयस्य! सकलोऽपि मूषिकगणः संक्षोभितः समुद्र इव आगतः । तत् त्वरितत्वरितं गच्छामः ।)

वज्रतुण्डः— सखे मा भैषीः ।

ईषत्कलुषतां प्राप्ते मदीये नयनाञ्चले।
वैवस्वतपुरीमेते गमिष्यन्ति न संशयः ॥ ४ ॥

[पुनस्तानवलोक्य]

वज्रतुण्डोऽस्मि वः कन्यामानयामि बलादिमाम् ।
शृणुतेदं तु शक्ताश्चेन्निवारयत मूषिकाः! ॥ ५ ॥

[इति क्रुद्धस्त्वरितमभिगच्छति ।]

विदूषकः— अदिरमणिज्जो हु वअस्सस्स पहावो जं एदस्स दंसणमत्तेण च्चिअ परंमुहा होन्ति मूसिआ । (अतिरमणीयः खलु वयस्यस्य प्रभावो यदेतस्य दर्शनमात्रेणैव पराङ्मुखा भवन्ति मूषिकाः ।)

वज्रतुण्डः— [प्रतिनिवृत्य] सखे ईदृशो मे पराक्रमः, यदेषा वरूथिनी मम दर्शनादेव भीता याता ।

विदूषकः— [ऊर्ध्वमवलोक्य] भो वअस्स! आअदं एदं पभादं । भो वयस्य आगतमेतत् प्रभातम् ।)

वज्रतुण्डः— अये! उदितोऽयं गभस्तिमाली । पश्य—

प्रियायाः पद्मिन्या विरहपरितापेन विगत-
प्रतापोऽयं रात्रौ रविरुदयशैलोपरिगतः ।
निजालोकोत्फुल्लां शशिकरकृतातङ्करहितां
सहस्रैर्दोर्ष्णां तां दृढमुपजुगूह प्रणयिनीम् ॥ ६ ॥

तद् गतं गत्वा विवाहं निर्वर्तयाम । [इति निष्क्रान्ताः ।]

द्वितीयोऽङ्कः ।

अथ तृतीयोऽङ्कः ।

[ततः प्रविशति वज्रतुण्डः ।]

वज्रतुण्डः— अये ! मध्यमध्यास्ते नभस्तलस्यांशुमान् । मयापि प्रेयसीस्तनतटपरिरम्भणपरवशीभूतेन एतावानविदितोऽयमतिक्रान्तः समयः । तद् वयस्यमाहूय सस्यफलशुक्तये निर्गच्छामः । [नेपथ्याभिमुखमालोक्य] वयस्य ! इतस्तावत् ।

[ततः प्रविशति विदूषकः ।]

विदूषकः— भो वअस्स ! अअं ह्मि । (भो वयस्य ! अयमस्मि ।)

वज्रतुण्डः— सस्यान्वेषणाय गच्छावः ।

विदूषकः— तह च्चिअ । [उभौ परिक्रामतः ।] (तथैव ।)

वज्रतुण्डः— [विलोक्य] अहो तु खलु अतिरमणीयोऽयं सस्याकरप्रदेशः । पश्य—

कलमानामलमरुणैः कणिशैः पक्वैरितस्ततः कीर्णः ।
आभाति भूमिगत इव तरणिः किरणैरयं हि केदारः ॥ १ ॥

विदूषकः— मए वि ण ईरिसो केआरो दिट्ठो । (मयापि नेदृशः केदारो दृष्टः ।)

वज्रतुण्डः— सखे ! अस्यान्तः प्रविश्य यथेष्टमाहारयावः । (तथा कृत्वा) सखे अधरिन् ! अधरिता किमु भवतः क्षुत्पीडा ।

विदूषकः— भो वअस्स! चिरस्स मम उदरं संपुण्णं खु। बुभुक्खा उण तिहुणं वि खाइदुकामा होइ। एदस्स किं करिस्सं। ता गच्छह्म। (भो वयस्य! चिरस्य ममोदरं सम्पूर्णं खलु। बुभुक्षा पुनस्त्रिभुवनमपि खादितुमना भवति। एतस्य किं करिष्यामि। तद् गच्छावः।)

वज्रतुण्डः—
आ! जन्मनः प्रभृति सस्यफलोपभोक्तु-
  रेवंविधा नहि बभूव ममातितुष्टिः।
अत्रान्तरे कथमिदं मम वामबाहुः
  प्रस्पन्दते किमपि तीव्रविषादशंसी॥ २॥

[नेपथ्ये]

परित्ताआहि परित्ताआहि। हा णाह! मुसिअह्मि। (परित्रायतां परित्रायताम्। हा नाथ! मुषितास्मि।)

विदूषकः— [ससंभ्रमं] भो वअस्स! पलाअह्म। एसो केआरो णाहमुद्दिसिअ पळपदि। जह सो ण पेक्खदि तह तुरिअतुरिअं पळाअह्म। अण्णं च भणामि— तुह वामभुअपरिप्फंदं सफळं। अज्ज मरणं एव्व। (भो वयस्य! पलायावः। एष केदारो नाथमुद्दिश्य प्रलपति। यथा स न प्रेक्षते तथा त्वरितत्वरितं पलायावः। अन्यच्च भणामि— तव वामभुजपरिस्पन्दं सफलम्। अद्य मरणमेव।)

वज्रतुण्डः— [विहस्य] मूर्ख! एष केदारः किं निष्प्राणः प्रलपति। कस्याश्चिद् योषित एवायं स्वरः।

[पुनर्नेपथ्ये]

हा मूसिअराअ! मं परित्ताआहि। को वि मं बळक्कारेण खाइदुकामो जीवदि। (हा मूषिकराज! मां परित्रायस्व। कोऽपि मां

बलात्कारेण खादितुकामो नयति ।)

वज्रतुण्डः— अये! मत्प्रेयस्या इव स्वरः । हा प्राणवल्लभे! परकरगृहीतया त्वया गन्तुं निर्गता अमी प्राणाः ।

मशक इव गानहीनो झेङ्कारेणो यथैव मण्डूकः ।
महिष इव निर्विषाणः शोच्यो नितरां त्वयाहमपि ॥ ३ ॥

हा प्रिये! कुतो गतासि । [इति मूर्च्छितः पतति ।]

विदूषकः— हा एसो पच्छिमं दसं गओ एव्व । अज्ज मए किं कादव्वं । दाव भणिस्सं । भो वअस्स! मए खु दिट्ठा एसा । (हा एष पश्चिमां दशां गत एव । अद्य मया किं कर्तव्यम् । तावद् भणिष्यामि । भो वयस्य! मया खलु दृष्टा एषा)

[इत्यर्धोक्ते ससंभ्रममुत्थाय]

वज्रतुण्डः— क्वासौ क्वासौ ।

विदूषकः— [किञ्चिद् विहस्य] मए खु दिट्ठा एसा हिज्जो सिविणे परावणीदा तुए मोच्चिदा अ । ता तं अण्णेसह्म । (मया खलु दृष्टैषा ह्यः स्वप्ने परापनीता त्वया मोचिता च । तत् ताम् अन्विष्यावः ।)

वज्रतुण्डः — सखे परवशीभूतानि मे गात्राणि । तत् कथम् अन्वेषयामि ।

विदूषकः— तुए एक्केण एव्व सअलाणं मूसिआणं संखोहिदाणं समक्खं तिस्से करपरिग्गहो किदो । तस्स दे दाणिं कहिं गदा धीरदा । (त्वयैकेनैव सकलानां मूषिकाणां संक्षोभितानां समक्षं तस्याः

कारापग्रहः कृतः । तस्य त इदानीं कुत्र गता वीरता ।)

वज्रतुण्डः— भोः! युक्तमेव भाषते । आः!

आस्तां विलोलतरसुन्दरुनायकानां
क्षुद्रं बलं मम दृगञ्चलशोणभीतम् ।
मार्जालकानपि मयि प्रतिकूलभावा-
नन्तं नयामि यदि नो नहि मूषिकोऽहम् ॥ ४ ॥

तदहमन्विष्ये तत्पदवीम् । भवानपि वनमूषिका गृहमूषिका जलमूषिका अधरिमूषिका इति चतुर्विधान् मे सैनिकानानीयमानाननुसरतु ।

विदूषकः— तह करिस्सं । [निष्क्रान्तः ।] (तथा करिष्यामि ।)

वज्रतुण्डः— [अग्रतो विलोक्य] अये आगतैव चतुर्विधा सेना ।

खरतरनखपातोद्धूतपृथ्वीरजोभिः
पिहितहरिपदेयं वाहिनी मूषिकाणाम् ।
रुधिरकलिततीव्रैः शाततुण्डाग्रभागै
रिपुगणभयदायिन्यागता वेगतो माम् ॥ ५ ॥

अये! दीर्घपुच्छनामा मम वाहिनीपतिस्तस्याः पृष्ठत एवागच्छति ।

[ततः प्रविशति दीर्घपुच्छः ।]

दीर्घपुच्छः— जयत्वार्यः । आज्ञप्तोऽस्मि भवत्पित्रा बृहत्तुण्डेन । यथा - वत्स दीर्घपुच्छ! मम तनयस्य वज्रतुण्डस्य प्रियतमां सुबालां रक्ताङ्गो नाम भुजङ्गाधमोऽपहृतवान् । तत् सेनामानीय त्वरिततरं गत्वा विजित्य तम् एनामानयेति । तदाज्ञापयत्वार्यः ।

वज्रतुण्डः— [सरोषं] किं किं भुजङ्गहतको मत्प्रियाम् अपहरति स्म । [विचिन्त्य]

यस्य मूषिकवरा वरूथिनी कर्तरीनिशिततुण्डमायुधम् ।
हा तुरीयभुवनप्रभोश्च मे तस्य कष्टमुरगो हि मानहा ॥ ६ ॥

भवतु । भवतु ।

अद्य प्रभिद्य हृदयं तरसा तदङ्गं
निर्गच्छदास्रकपिशीकृतसर्वगात्रः ।
आनीय मद्भुजयुगेन तदान्त्रमालां
वक्षस्यहो स्रजमिवाकलये मदीये ॥ ७ ॥

तदग्रतो गच्छ ।

दीर्घपुच्छः— यदाज्ञापयत्यार्यः ।

[सेनां पुरस्कृत्य परिक्रामतः ।]

दीर्घपुच्छः— किमातिमात्रसङ्कुलं मे सैन्यम् । [अग्रतो विलोक्य] अये भुजङ्गमोऽयं दृश्यते ।

दंष्ट्राकरालं वदनं विदार्य मुञ्चन् प्रियां मूषिकवंशभर्तुः ।
आयाति तूर्णं भुजगेश्वरोऽसौ युगान्तदीप्तानलतुल्यतेजाः ॥ ८ ॥

वज्रतुण्डः— किं किमागच्छति भुजङ्गहतकः । तद् वयमपि सन्नद्धास्त्वरिततरमभिगच्छामः ।

[निष्क्रान्ताः सर्वे ।]

इति तृतीयोऽङ्कः ।

अथ चतुर्थोऽङ्कः ।

[ततः प्रविशति कृकलासकुमारः ।]

कृकलासकुमारः— आदिष्टोऽस्मि मात्रा विषपुच्छया । यथा— इदं कीटमांसमानीतमुपभोक्तुं पितरं सत्वरमानयेति । तत् पितरं द्रक्ष्यामि । [परिक्रामति ।]

[ततः प्रविशति वृद्धकृकलासः ।]

वृद्धकृकलासः— अये पुत्रोऽयं मे समागतः । [सत्वरं सप्रमोदं चालिङ्ग्य] वत्स! किमत्यन्तग्लानं ते मुखम् ।

कुमारः— आर्य! अद्य प्रातरेवाम्बानियोगात् कीटमांसभक्षणाय भवन्तमानेतुं मातृसकाशादागतोऽहम् । मध्येमार्गमदृष्टपूर्वमाश्चर्यमयं वृत्तान्तं दृष्ट्वैतावन्तं कालं विस्मयाविष्टमना अतिष्ठम् । ततः क्षुत्पिपासया कालातिक्रमणभयाच्च त्वरिततरं भवन्तमागतः ।

वृद्धः— वत्स! कीदृशो वृत्तान्तस्त्वया दृष्टः ।

कुमारः— श्रूयतां तावत् । अद्य निजप्रियतमां सुबालां भक्षणार्थमपहृत्य प्रातरेव रक्ताङ्गभुजङ्गराजं गच्छन्तं ससैन्यो युद्धाय समावृणोद् वज्रतुण्डो नाम मूषिककुमारः ।

वृद्धः— अहो नु खलु भुजङ्गमं मूषिका युद्धायाभिधावन्तीत्येतदत्याहितम् । ततस्ततः ।

कुमारः — ततोऽभिमुखगतानेतान् भुजङ्गराजोऽपि निष्प्राणां मूषिकवल्लभां भूमौ निक्षिप्य क्रुद्धः समेत्य निजश्वसितेन दंष्ट्राद्वयेन-च कांश्चिज्जघान । ततः पलायितं मूषिकगणं विलोक्य,

निजखरनखराग्रैर्लुप्यमानो भुजङ्गं
सुषिरमवजगाहे भीतवन्मूषिकेन्द्रः ।
तदनुगमनकाङ्क्षी रोषवान् नागराजो
विवरमनुनिविष्टः पूर्वकायेन वेगात् ॥ १ ॥

वृद्धः — ततस्ततः ।

कुमारः — ततस्त्वरितमन्येन पथा गत्वा निर्गत्य निशिततर-निजतुण्डेन नागस्यापरकायं शतशः खण्डयित्वा विवरमुखद्वयमपि पाषाणादिभिः पूरयित्वा निजकान्तासमीपमुद्दिश्य गतवान् वज्रतुण्डः । अहमपि त्वरितमागतः ।

वृद्धः — अहो विचित्रतरमुपायमेतत् । आवां मांसभक्षणाय गच्छावः । [निष्क्रान्तौ ।]

विष्कम्भकः ।

[ततः प्रविशति वज्रतुण्डः दीर्घपुच्छविदूषकाभ्यां संवाहितगात्रः ।]

वज्रतुण्डः — अश्रुतपूर्वमाश्चर्यमिदं कर्म । कुतः,

वीर्योत्कटानपि बहूनपि मूषिकाणां
सङ्घान्निहन्ति शिशुरप्युरगः क्षणेन ।

ते हन्ति नैव तमतः खलु पूर्वमस्य
जातेर्गुणो न जय इत्यखिला विदन्तु ॥ २ ॥

दीर्घपुच्छः—
किमेतत् कृतकं वीर त्वया निहत इत्यहिः ।
रावणोऽपि हतो युद्धे रामेण मनुजेन हि ॥ ३ ॥

तादृशो ननु भवान् । स भूपतिः, पातालपतिर्भवान्, इयानेनं भेदः । क्वायमस्ते स दुर्मतिः ।

[नेपथ्ये]

विदूषकः— भो भो! सिग्घं देसंतरं पडि पळाअह्म । तस्स भुअंगराअस्स मरणं सोदूण सेणावइणो सेण्णं आअच्छादि । ता सिग्घं पळाअह्म । (भो भो! शीघ्रं देशान्तरं प्रति पलायामः । तस्य भुजङ्गराजस्य मरणं श्रुत्वा सेनापतेः सैन्यमागच्छति । तच्छीघ्रं पलायामः ।)

वज्रतुण्डः— पितुर्मे पाषाणदारणस्य वचनमिव श्रूयते । [ततः प्रविशति पाषाणदारणः ।]

पाषाण०— क्वायमस्ते स दुर्मतिः । मम प्रियसुतामपहृत्य क्वायमास्ते । अये वज्रतुण्डो ननु दृश्यते ।

[वज्रतुण्डः सत्वरमुपसृत्य पादयोः प्रणामं करोति ।]

पाषाण०— वत्स कथं ते मुखक्षतिः ।

वज्रतुण्डः— श्रूयतां तावत् । अद्य,
प्रातर्मदीयदयितामपहृत्य यान्तं
रक्ताङ्गमेष भुजगाधिपमाहवान्ते ।

तुण्डाग्रखण्डिततनुं तरसा निहत्य
तच्छ्रान्तिशान्तिकरणार्थमिह स्थितोऽस्मि ॥ ४ ॥

पाषाण०— [सप्रमोदमालिङ्ग्य शिरसि करं दत्त्वाशीर्वादं कृत्वा] अश्रुतपूर्वमिदं त्वया कृतम्। अद्याहमपि प्रातरुत्थाय,

कृत्वा प्रत्यूषकृत्यं मशककुलपतेर्गीतिमाकर्ण्य तृप्त्वा
भक्त्या सम्पूज्य विघ्नाधिपवहनपटुं मूषिकेन्द्रं प्रणम्य।
गत्वान्तर्धान्यगेहं कलमकणिशमाहृत्य भुक्त्वा यथेष्टं
श्रुत्वा वत्सां भुजङ्गक्षितिभृदपहृतामागतः शोकतोऽहम् ॥ ५ ॥

विदूषकः— भो वअस्स! आअदं एव्व रत्तीए मुहम्। (भो वयस्य आगतमेव रात्र्या मुखम्।)

वज्रतुण्डः— [ऊर्ध्वमवलोक्य] अये! अस्तमितोऽयं भानुमाली। पश्य—

पद्मिनीं निजकरैरुपगूह्य प्रेयसीं सुचिरमेष यथेष्टम्।
निर्गमे विरहतप्त इवासावम्बुधौ परिपपात दिनेशः ॥ ६ ॥

तत् प्राणेश्वरीं द्रष्टुं गच्छावः। [इति निष्क्रान्तः।]

इति चतुर्थोऽङ्कः।

अथ पञ्चमोऽङ्कः ।

[ततः प्रविशति अङ्कस्थापितप्रियो वज्रतुण्डः पाषाणदारण-
विदूषकाभ्यां सह ।]

वज्रतुण्डः— अयि प्राणवल्लभे! कथमनुरागिणं मामपि परित्यज्य परलोकं गतासि ।

पाषाण०—

वत्से! मदुत्सङ्गनिवेशनञ्च
विश्लेषदीनां तव मातरं च ।
विहाय मुग्धे! क्व गतासि मन्ये
निर्वत्सला स्निग्धजनेषु नार्यः ॥ १ ॥

वज्रतुण्डः—

दयिते! नयनाञ्चलेन मां
सकृदालोकय लोकभूषणे! ।
किमनागसि वल्लभे मना-
गनुरक्ते मयि नानुकम्पसे ॥ २ ॥

विदूषकः— वअस्स! दुट्ठभुअंगपीडणसंभमसंदावाए एदाए संदावसंतिं करिस्सं । [इति वालाग्रेण वीजयित्वा ससंभ्रमं] भो भो वअस्स! जीविदा खु एसा । इमाए केसग्गाणि किंपि चळन्ति ।

(वयस्य! दुष्टभुजङ्गपीडनसंभ्रमसन्तापाया एतस्याः सन्तापशान्तिं करिष्यामि। भो भो वयस्य! जीविता खल्वेषा। अस्याः केशाग्राणि किमपि चलन्ति।)

वज्रतुण्डः— मूर्ख! वालमारुतेनैव केशाग्राणि चलन्ति। इयं खलु निष्करुणेन कृतान्तेन नितान्तनाशितैव। वृथाकृतो मत्प्रयत्नः। हा प्राणवल्लभे! [इति मूर्च्छितः पतति।]

विदूषकः— हा वअस्सो वि पच्छिमं अवत्थं गदो एव्व। अहं पि उब्बन्धिअ मरिस्सं। [इति पाशं गृह्णाति।] (हा वयस्योऽपि पश्चिमामवस्थां गत एव। अहमपि उद्बन्ध्य मरिष्यामि।)

पाषाण०— हा निष्करुणोऽयं विधिः, येनैतावतीमवस्थां मां दर्शयितुं कल्पितः। तस्मादहमपि संस्थास्ये। [इति निजनखराग्राणि कर्णे प्रवेशयति।]

विदूषकः— अए मूसिअभअवं आअच्छदि। (अये मूषिकभगवानागच्छति।)

[ततः प्रविशति महामूषिकः।]

महामूषिकः— आज्ञप्तोऽस्मि विघ्नेश्वरेण भगवता। यथा— अहं तावत् पितुः प्रणामं करिष्ये। त्वमप्यम्बासमीपान्मोदकानि कदलीपक्वानि चानयेति। तत् तथा करोमि। [वामाक्षिस्पन्दनं सूचयति।] किमस्य दुर्निमित्तस्य फलम्। [विचिन्त्य] भवतु। दृष्टम्। मदाराधनतत्परस्य वज्रतुण्डस्य महाननर्थः सम्भवति। तत् त्वरितं गच्छामि। [परिक्रम्य] अये मोहं गत एवायम् [तस्याङ्गे जलं विक्षिपति। वज्रतुण्डः

ससंभ्रममुत्थाय पादप्रणामं करोति । महामूषिको वज्रतुण्डमालिङ्ग्याशीर्वादं करोति ।]

विदूषकः— भअवं! अदिदूसहसङ्कडे पडिदाणं अम्हाणं अइन्तिदोवणदं मिट्ठभोअणं विअ सुहअरं होइ भअवदो दंसणं । (भगवन्! अतिदुस्सहसङ्कटे पतितानामस्माकमचिन्तितोपनतं मिष्टभोजनमिव सुखकरं भवति भगवतो दर्शनम् ।) [महामूषिकः सलिलं जप्त्वा विक्षिप्य सुबालां च जीवयति । सुबाला उत्थाय पादप्रणामं करोति ।]

महामूषिकः— भद्रे! स्वस्त्यस्तु ते । भर्ता भवत्या दीर्घायुर्भवतु । त्वमपि बहुपुत्रयुता भव ।

पाषाण०— [प्रणम्य] महाननुग्रहोऽस्मासु भवता कृतः ।

महामूषिकः— स्वस्ति भवते ।

[पाषाणदारणः सुबालाविदूषकाभ्यां निष्क्रान्तः ।]

वज्रतुण्डः— उत्तीर्णा वयमस्माद् व्यसनाम्बुधेः ।

महामूषिकः— किं ते प्रियान्तरमुपहरामि ।

वज्रतुण्डः—

अभिमतदयितापि जीविता
  मम भगवन् भवतः प्रसादतः ।
युधि रिपुरपि निर्जितो बली
  प्रियतरमन्यदतो न विद्महे ॥ ३ ॥

तथाप्येतावदस्तु— [भरतवाक्यम्]

इष्टं भूयाज्जनानामभिमतकळमाशालिनीं भूतधात्रीं
मृत्स्नां कुर्वन्तु कल्पावधि सलिलधराः कालवृष्ट्या नितान्तम् ।
एवं युष्मत्प्रसादाद्दिनमनुभवतां श्रेयसे मामकीना
भक्तिर्विश्वेशपादाम्बुजयुगळगताप्यस्तु जन्मान्तरेऽपि ॥ ४ ॥

[निष्क्रान्ताः सर्वे ।]

पञ्चमोऽङ्कः ॥